# Yajnavalkya Upanishad

# યાજ્ઞવલ્ક્યોપનિષત્

## Document Information

Text title : Yajnavalkya Upanishad

File name : yajnavalkya.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 97 / 108; Shukla Yajurveds - Sanyasa upanishad

Latest update : April, 16, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# યાજ્ઞવલ્ક્યોપનિષત્

સંન્યાસજ્ઞાનસમ્પન્ના યાન્તિ યદ્વૈષ્ણવં પદમ્ ।
તદ્વૈ પદં બ્રહ્મતત્ત્વં રામચન્દ્રપદં ભજે ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ અથ જનકો હ વૈદેહો યાજ્ઞવલ્ક્યમુપસમેત્યોવાચ
ભગવન્સંન્યાસમનુબ્રૂહીતિ કથં સંન્યાસલક્ષણમ્ । સ
હોવાચ યાજ્ઞવલ્ક્યો બ્રહ્મચર્યં સમાપ્ય ગૃહી ભવેત્ ।
ગૃહાદ્વની ભૂત્વા પ્રવ્રજેત્ । યદિ વેતરથા બ્રહ્મચર્યાદેવ
પ્રવ્રજેદ્ગૃહાદ્વા વનાદ્વા । અથ પુનર્વ્રતી વાવ્રતી વા સ્નાતકો
વાઽસ્નાતકો વા ઉત્સન્નાગ્નિરનગ્નોકોઽવા યદહરેવ વિરજેત્તદહરેવ
પ્રવ્રજેત્ । તદેકે પ્રાજાપત્યામેવેષ્ટિં કુર્વન્તિ । અથ વા ન
કુર્યાદાગ્નેય્યામેવ કુર્યાત્ । અગ્નિર્હિ પ્રાણઃ । પ્રાણમેવૈતયા કરોતિ ।
ત્રૈધાતવીયામેવ કુર્યાત્ । એતયૈવ ત્રયો ધાતવો યદુત સત્ત્વં
રજસ્તમ ઇતિ અયં તે યોનિરૃત્વિજો યતો જાતો અરોચથાઃ । તં જાનન્નગ્ન
આરોહાથાનો વર્ધયા રયિમિત્યનેન મન્ત્રેણાગ્નિમાજિઘ્રેત્ । એષ વા
અગ્નેર્યોનિર્યઃ પ્રાણં ગચ્છ સ્વાં યોનિં ગચ્છ સ્વાહેત્યેવમેવૈત-
દાગ્રામાદગ્નિમાહૃત્ય પૂર્વવદગ્નિમાજિઘ્રેત્ યદગ્નિં ન વિન્દેદપ્સુ
જુહુયાદાપો વૈ સર્વા દેવતાઃ સર્વાભ્યો દેવતાભ્યો જુહોમિ સ્વાહેતિ
સાજ્યં હવિરનામયમ્ । મોક્ષમન્ત્રસ્ત્રય્યેવં વેદ તદ્બ્રહ્મ
તદુપાસિતવ્યમ્ । શિખાં યજ્ઞોપવીતં છિત્ત્વા સંન્યસ્તં મયેતિ
ત્રિવારમુચ્ચરેત્ । એવમેવૈતદ્ભગવન્નિતિ વૈ યાજ્ઞવલ્ક્યઃ ॥ ૧॥

અથ હૈનમત્રિઃ પપ્રચ્છ યાજ્ઞવલ્ક્યં યજ્ઞોપવીતી
કથં બ્રાહ્મણ ઇતિ । સ હોવાચ યાજ્ઞવલ્ક્ય ઇદં

પ્રણવમેવાસ્ય તદ્યજ્ઞોપવીતં ય આત્મા । પ્રાશ્યાચમ્યાયં
વિધિરથ વા પરિવ્રાડ્વિવર્ણવાસા મુણ્ડોઽપરિગ્રહઃ શુચિરદ્રોહી
ભૈક્ષમાણો બ્રહ્મ ભૂયાય ભવતિ । એષ પન્થાઃ
પરિવ્રાજકાનાં વીરાધ્વનિ વાઽનાશકે વાપાં પ્રવેશે
વાગ્નિપ્રવેશે વા મહાપ્રસ્થાને વા । એષ પન્થા બ્રહ્મણા
હાનુવિત્તસ્તેનેતિ સ સંન્યાસી બ્રહ્મવિદિતિ । એવમેવૈષ ભગવન્નિતિ
વૈ યાજ્ઞવલ્ક્ય । તત્ર પરમહંસા નામ સંવર્તકારુણિ-
શ્વેતકેતુદૂર્વાસઋભુનિદાઘદત્તાત્રેયશુકવામદેવ-
હારીતકપ્રભૃતયોઽવ્યક્તલિઙ્ગાઽવ્યક્તાચારા અનુન્મત્તા
ઉન્મત્તવદાચરન્તઃ પરસ્ત્રીપુરપરાઙ્મુખાસ્ત્રિદણ્ડં
કમણ્ડલું ભુક્તપાત્રં જલપવિત્રં શિખાં યજ્ઞોપવીતં
બહિરન્તશ્ચેત્યેતત્સર્વં ભૂઃ સ્વાહેત્યપ્સુ પરિત્યજ્યાત્માન-
મન્વિચ્છેત્ । યથા જાતરૂપધરા નિર્દ્વન્દ્વા નિષ્પરિગ્રહા-
સ્તત્ત્વબ્રહ્મમાર્ગે સમ્યક્સમ્પન્નાઃ શુદ્ધમાનસાઃ
પ્રાણસન્ધારણાર્થં યથોક્તકાલે વિમુક્તો ભૈક્ષમાચર-
ન્નુદરપાત્રેણ લાભાલાભૌ સમૌ ભૂત્વા કરપાત્રેણ વા
કમણ્ડલૂદકપો ભૈક્ષમાચરન્નુદરમાત્રસંગ્રહઃ
પાત્રાન્તરશૂન્યો જલસ્થલકમણ્ડલુરબાધકરહઃસ્થલ-
નિકેતનો લાભાલાભૌ સમૌ ભૂત્વા શૂન્યાગારદેવગૃહ-
તૃણકૂટવલ્મીકવૃક્ષમૂલકુલાલશાલાગ્નિહોત્રશાલાનદી-
પુલુનગિરિકુહરકોટરકન્દરનિર્ઝરસ્થણ્ડિલેષ્વનિકેતનિવાસ્ય-
પ્રયત્નઃશુભાશુભકર્મનિર્મૂલનપરઃ સંન્યાસેન
દેહત્યાગં કરોતિ સ પરમહંસો નામેતિ । આશામ્બરો ન
નમસ્કારો ન દારપુત્રાભિલાષી લક્ષ્યાલક્ષ્યનિર્વર્તકઃ
પરિવ્રાટ્ પરમેશ્વરો ભવતિ । અત્રૈતે શ્લોકા ભવન્તિ ।
યો ભવેત્પૂર્વસંન્યાસી તુલ્યો વૈ ધર્મતો યદિ ।
તસ્મૈ પ્રણામઃ કર્તવ્યો નેતરાય કદાચન ॥ ૧॥

પ્રમાદિનો બહિશ્ચિત્તાઃ પિશુનાઃ કલહોત્સુકાઃ ।
સંન્યાસિનોઽપિ દૃશ્યન્તે દેવસંદૂષિતાશયાઃ ॥ ૨॥

નામાદિભ્યઃ પરે ભૂમ્નિ સ્વારાજ્યે ચેત્સ્થિતોઽદ્વયે ।
પ્રણમેત્કં તદાત્મજ્ઞો ન કાર્યં કર્મણા તદા ॥ ૩॥

ઈશ્વરો જીવકલયા પ્રવિષ્ટો ભગવાનિતિ ।
પ્રણમેદ્દણ્ડવદ્ભૂમાવાશ્વચણ્ડાલગોખરમ્ ॥ ૪॥

માંસપાઞ્ચાલિકાયાસ્તુ યન્ત્રલોકેઽઙ્ગપઞ્જરે ।
સ્નાય્વસ્થિગ્રન્થિશાલિન્યઃ સ્ત્રિયઃ કિમિવ શોભનમ્ ॥ ૫॥

ત્વઙ્માંસરક્તબાષ્પામ્બુ પૃથક્કૃત્વા વિલોચને ।
સમાલોકય રમ્યં ચેત્કિં મુધા પરિમુહ્યસિ ॥ ૬॥

મેરુશૃઙ્ગતટોલ્લાસિ ગઙ્ગાજલસ્યોપમા ।
દૃષ્ટા યસ્મિન્મુને મુક્તાહારસ્યોલ્લસશાલિતા ॥ ૭॥

શ્મનાનેષુ દિગન્તેષુ સ એવ લલનાસ્તનઃ ।
શ્વભિરાસ્વાદ્યતે કાલે લઘુપિણ્ડ ઇવાન્ધસઃ ॥ ૮॥

કેશકજ્જલધારિણ્યો દુઃસ્પર્શા લોચનપ્રિયાઃ ।
દુષ્કૃતાગ્નિશિખા નાર્યો દહન્તિ તૃણવન્નરમ્ ॥ ૯॥

જ્વલના અતિદૂરેઽપિ સરસા અપિ નીરસાઃ ।
સ્ત્રિયો હિ નરકાગ્નીનામિન્ધનં ચારુ દારુણમ્ ॥ ૧૦॥

કામનામ્ના કિરાતેન વિકીર્ણા મુગ્ધચેતસઃ ।
નાર્યો નરવિહઙ્ગાનામઙ્ગબન્ધનવાગુરાઃ ॥ ૧૧॥

જન્મપલ્વલમત્સ્યાનાં ચિત્તકર્દમચારિણામ્ ।
પુંસાં દુર્વાસનારજ્જુર્નારીબડિશપિણ્ડિકા ॥ ૧૨॥

સર્વેષાં દોષરત્નાનાં સુસમુદ્ગિકયાનયા ।
દુઃખશૃઙ્ખલયા નિત્યમલમસ્તુ મમ સ્ત્રિયા ॥ ૧૩॥

યસ્ય સ્ત્રી તસ્ય ભોગેચ્છા નિસ્ત્રીકસ્ય ક્વ ભોગભૂઃ ।
સ્ત્રિયં ત્યક્ત્વા જગત્ત્યક્તં જગત્ત્યક્ત્વા સુખી ભવેત્ ॥ ૧૪॥

અલભ્યમાનસ્તનયઃ પિતરૌ ક્લેશયેચ્ચિરમ્ ।
લબ્ધો હિ ગર્ભપાતેન પ્રસવેન ચ બાધતે ॥ ૧૫॥

જાતસ્ય ગ્રહરોગાદિ કુમારસ્ય ચ ધૂર્તતા ।
ઉપનીતેઽપ્યવિદ્યત્વમનુદ્વાહશ્ચ પણ્ડિતે ॥ ૧૬॥

યૂનશ્ચ પરદારાદિ દારિદ્ર્યં ચ કુટુમ્બિનઃ ।
પુત્રદુઃખસ્ય નાસ્ત્યન્તો ધની ચેન્મ્રિયતે તદા ॥ ૧૭॥

ન પાણિપાદચપલો ન નેત્રચપલો યતિઃ ।
ન ચ વાક્ચપલશ્ચૈવ બ્રહ્મભૂતો જિતેન્દ્રિયઃ ॥ ૧૮॥

રિપૌ બદ્ધે સ્વદેહે ચ સમૈકાત્મ્યં પ્રપશ્યતઃ ।
વિવેકિનઃ કુતઃ કોપઃ સ્વદેહાવયવેષ્વિવ ॥ ૧૯॥

અપકારિણિ કોપશ્ચેત્કોપે કોપઃ કથં ન તે ।
ધર્માર્થકામમોક્ષાણાં પ્રસહ્ય પરિપન્થિનિ ॥ ૨૦॥

નમોઽસ્તુ મમ કોપાય સ્વાશ્રયજ્વાલિને ભૃશમ્ ।
કોપસ્ય મમ વૈરાગ્યદાયિને દોષબોધિને ॥ ૨૧॥

યત્ર સુપ્તા જના નિત્યં પ્રબુદ્ધસ્તત્ર સંયમી ।
પ્રબુદ્ધા યત્ર તે વિદ્વાન્સુષુપ્તિં યાતિ યોગિરાટ્ ॥ ૨૨॥

ચિદિહાસ્તીતિ ચિન્માત્રમિદં ચિન્મયમેવ ચ ।
ચિત્ત્વં ચિદહમેતે ચ લોકાશ્ચિદિતિ ભાવય ॥ ૨૩॥

યતીનાં તદુપાદેયં પારહંસ્યં પરં પદમ્ ।
નાતઃ પરતરં કિઞ્ચિદ્વિદ્યતે મુનિપુઙ્ગવઃ ॥ ૨૪॥

ઇત્યુપનિષત્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ યાજ્ઞવલ્ક્યોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Yajnavalkya Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*